- Title – न्यासदशक
- Accession No – Title –
- Accession No – ७
- Folio No/ Pages – ५/8
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – श्रीमते रामानुजाय नमः वेदान्ताचार्य-गुरुर्यदिदं न्यासस्य दशकमाचष्टे
- End – इति वेदान्ताचार्यकृतिषु न्यासदशक· संपूर्णम्
- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author - वेदान्ताचार्य
- Remarks- संपूर्ण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ श्रीमते रामानुजाय नमः ॥ वेदांताचार्य्यगुरुर्यदिदं न्यासस्य दशकमाचख्ये व्याख्यास्यति तत्समासात् श्रीभाष्य श्रीनिवास इहसूरिः १
इह खलु सात्विकजनानुप्रेरितः श्रीमान्वेदांताचार्य्य इति जगति प्रसिद्धः श्रीमद्वेंकटनाथार्य्यः न्यासविद्यायाः स्वरूपं स्वभावं च प्र
पत्तिशास्त्रप्रपंचितं विरलबुद्धीनां सुग्रहत्वाय दशभिरनुष्टुभिः पद्यैः संजग्राह तं न्यासदशकाख्यं ग्रंथं पथ्योपदेशं पथ्यामाति
संग्रहतो व्याख्यास्यति श्रीनिवासाचार्य्यः कौशिकान्वयसंभवस्तत्राद्यैस्त्रिभिः पद्यैः द्वयस्य पूर्वखंडोक्तभरन्यासो विवि
च्यते चतुर्थेनोत्तरखंडोक्तफलप्रार्थनाक्रियते पंचभिरुत्तरैः कृत्यं प्रार्थनाव्याजेनाविविच्यते अंते न्यासस्य नैर्भर्य्यं तत्त्वा निगम्यते

श्रीमान्वेंकटनाथार्य्यः कवितार्किककेशरी वेदांताचार्य्यवर्य्यो मे संनिधत्तां सदा हृदि ॥१॥ अहं मद्रक्षण
भरो मद्रक्षणफलं तथा न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥२॥

प्रथमश्लोकेनांगीभूतस्यात्मरक्षाभरस
दि मर्पणस्य स्वरूपं समर्पणत्रयेपि भरसमर्पणमेव प्रधानांश इत्याह अहमर्थः आत्मस्वरूपं न मम ममशेषभूतं न भवति अहमिति
इदमन्येषामप्युपलक्षणं किंतु श्रीपतेरेव सर्वशेषिणः निरुपाधिकशेषिणः श्रीपतेरेव शेषभूतमित्यनुसंधानमेव स्वरू
पसमर्पणमिदं सर्वत्र सर्वदानुवर्त्तते अत्रापरत्र च मद्रक्षणं नामार्चिरादिगत्या भगवदनुभवकैंकर्य्यप्राप्तिस्तद्रूपं फलं
च न मम श्रीपतेरेवेति पूर्ववदर्थः इत्यनुसंधानं फलन्यासः इदमपि सर्वदानुवर्त्तते मद्रक्षणभरो मद्रक्षणनिर्वाहश्च न मम राम
१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ अथ पर्रत्तीयेन पद्येन सांगमात्मरक्षाभरसमर्पणं चाभिव्रति धर्मसारथाएव प्राप्तफलसंगकर्तृत्वत्यागपूर्वकमनुष्ठेयमि

स्वामिन् २ त्याह इति भोः स्वामिन् परमशेषिन् श्रियःपते स्वशेषं स्वस्वरूपानिरूपाधिकानन्यार्हशेषभूतं स्वं स्ववशं स्वाधीनं स्वनियाम्यमित्यर्थः

स्वभरत्वेन स्वात्मिन्न्यस्तभरत्वेन निर्भरं निर्भरीभवितुं योग्यं यद्वा स्वभरत्वेनानिर्भरोभविष्यामीति तया स्वदत्तस्वाधिया स्व

दत्तया स्वाधिया स्वाविषया धीर्भरन्यसनरूपा इयं भगवद्दत्ति द्वयाधीर्भवति सा च स्वेनैव भगवता दत्ता करणकलेवरप्रदा

६ नजायमानकालवीतणयोर्दिकस्कृतात्साध्यप्रापणादि द्वारा भगवतैव संपादिता तया प्रपत्या त्वयाधियामात्म

स्वामिन्स्वशेषं स्ववशं स्वभरत्वेन निर्भरं स्वदत्तस्वधिया स्वार्थं स्वस्मिन्न्यस्यति मां स्वयं ३

यमेव परप्रार्थनं विनाऽत्र भरन्यासे स्वयमेव मुख्यकर्त्तासन् स्वार्थं स्वकीयवस्तुलाभस्वप्रयोजनाय स्वात्मिन्स्वात्मनि न्य

स्यसि भरन्यसनं करोषि त्वमत्रान्वयः यथा स्वामी स्वकीयं वस्तु वस्त्रादि स्वात्मनि स्वार्थे स्वयमेव न्यस्यति तद्वत्तत्र व(

स्त्रादेर्वस्तुनः न्यासकर्तृत्वेन्न्यासस्यानत्वे सहकारित्वे च यथान्वयो नास्ति तथा ममाज्ञायीति भावः ३ ॥=॥=॥

ती त राम २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृत्यमपि तु श्रियःपतेरेव कृत्यामित्यनुसंधानं ॥ इत्यादिमंत्रेणांगैः पंचभिस्सह त्वाभिलाषितफलार्थं सकृच्छ्रीपते अयमेव भरन्यासः
प्रपत्तिरिति चोच्यते १ त्युक्तप्रकारेणात्मानं आत्मरक्षणमित्यर्थः निक्षिपेत् भगवति समर्पयेत् बुधः प्रपत्तिशास्त्रतत्त्वज्ञः यद्वात्म
शब्देनात्मस्वरूपमात्मरक्षणं रक्षाफलं चेति त्रयमिति विवक्ष्यते श्रीपतौ भगवति निक्षिपेत् यत्तद्वयेपि स्वरूपसमर्पणसहितं रक्षा
भरसमर्पणं भगवति कर्तव्यं तत्र भरसमर्पणमेव प्रधानमितरद्द्वयं तदवयवम् तमित्युक्तं भवति १ अथ रक्षणभारसमर्पणरूपमं
ग्यानुकूल्यसंकल्पाद्यंगपंचकानियतमेवानुष्ठेयामिति दर्शयितुं भगवंतं संबोध्य तत्रस्वयमनुतिष्ठति न्यस्यामीति भो श्रीमन्न

न्यस्याम्यकिंचनः श्रीमन्ननुकूलोन्यवर्जितः विश्वासप्रार्थनापूर्वमात्मरक्षाभरं त्वयि ॥ २ ॥

नेन विशेषणेन श्रीविशिष्टो भगवानेव भरन्यासविषय इति सूच्यते अकिंचनः उपांतराणीतानुमनुष्ठानुमप्यशक्तोहं अनुकूलः
नवानुकूलमेवाचरेयामिति कृतसंकल्पः अन्यवर्जितः अनेन तदितरेण प्रातिकूल्याचरणेन [illegible] रहितो भवेयमिति संकल्प
श्चाविश्वासप्रार्थनापूर्वं सर्वथा त्वं मां रक्षसीति महाविश्वासः त्वमेवोपायभूतो मे त्वं मे गोपायिता भवेति प्रार्थना च तत्पूर्वक
के मात्मरक्षाभरं मद्रक्षणभरं त्वयि सर्वज्ञे सर्वशक्तौ व्याप्ते शेषिणि न्यस्यामि समर्पयामीत्यपं सांगभरसमर्पणप्रकारो दर्शितः ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ रहितानि ऐहिकामुष्मिकत्वेन द्विविधानि तैर्वर्जितं कुरु किं चात्रामुत्र चानित्याकिंकरं सदा त्वत्कैंकर्यैकनिरतं च कुरु यथेत्थं भवे
यं तथानुग्रहाणेति भावः ५ अथ देव्यादि महिषीपरिजनपरिच्छदविशिष्टस्य तव नित्यपराधेषु अपराधरहितेषु कैंकर्येष्वे
व मां नियोजयेत्याह भो भगवन् मां तव पादारविंदाश्रितं देव्यः श्रीभूलीलाद्याः भूषणानि श्रीवत्सश्रीकौस्तुभकिरीटवनमाला
नूपुरहारादीनि हेतयः श्रीशंखचक्राद्याः आदिशब्देनानंतगरुडविष्वक्सेनादयः छ

देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव ॥
नित्यं निरपराधेषु कैंकर्येषु नियुंक्ष्व मां ६
मां मदीयं च निखिलं चेतनाचेतनात्मकम्
स्वकैंकर्योपकरणं वरद स्वीकुरु स्वयं ७

अ. श्लोकीभाष्यः ७ त्र चामरादिपरिच्छदास्तु गरुडं ते एतैस्सर्वैराका रैर्जुष्टस्य परिपूर्णस्य तव नित्यमिहामुत्र चानि
रपराधेषु अपराधरहितेषु कैंकर्येषु नियुंक्ष्व विनियोजय ६॥ अथ मां मदीयं सर्वं वस्तु च त्वत्कैंकर्योपकरणतया स्वीकुर्वित्याह भगवानि
ति भो वरद आश्रितानां तत्तदभिलषितवरद स्वयमेव मां त्वाद्यनन्यपरं मदीयं मम संबंधि च यच्चेतनरूपं पुत्रकलत्रादि अचेतनात्मकं
गृहक्षेत्रादि निखिलं सर्वं निरवशेषितं त्वत्कैंकर्येषु उपकरणतया स्वीकुरु यद्यद्वस्तु यत्र यत्र कैंकर्येषूपकारणं स्यात्तत्र तदुपकरण

राम ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थेन श्लोकेन कृपयावक्रममनुसृत्योपायवरणानंतरं फलप्रार्थनां करोति भो श्रीमन्नभीष्टवरद तत्तदधिकारिणां तत्तद
भीष्टफलप्रद अहमिदानीं त्वां शरणं गतोस्मि उचितगुणपरिपूर्णं शेषविलंघ्योग्यं शास्त्रशरणं च शरणं गतोस्मि तत्तणोपायत्वेन
व्रतवानस्मि किं फलमुद्दिश्येत्यत्राह एतद्देहांते मोक्तार्थोमित्युक्तं भवति वर्तमानशरीरपतनानंतरं मां त्वयि न्यस्तभरं त्वमिदं
परमपदं नापहृपिणत्तव श्रीपादारविंदद्वंद्वं स्वयं त्वमेवागत्य केवलैरातिवाहिकैर्न मां प्रापय किं तु तैस्सहार्चिरादिमार्गे

श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम् ४ त्वच्छेषत्वे स्थिरमतिं त्वत्प्राप्त्ये
कप्रयोजनं निषिद्धकाम्यरहितं कुरु मां नित्यकिंकरम् ५

णमां प्रापयमोक्तार्थं शरणं गत इति भावः ४ अथ त्रिभिः श्लोकै
रुत्तरत्र यावच्छरीरपातं त्वानुरूपकैंकर्यं प्रार्थ्यते तत्र प्रथमेन शेषत्वेनैसंधानपूर्वकं नित्यकिंकरतां स्वस्य प्रार्थ्यते भो श्री 3
भगवन् मां त्वयि न्यस्तभरं त्वच्छेषत्वे इति विषयसप्तमी स्थिरमतिं चंचलबुद्धिं यावदात्मानं त्वच्छेषत्वानुसंधानरसिकं कुरु
त्व त्किं च त्वत्प्राप्तिः परमपदे ऽत्र च त्वदनुभवकैंकर्यप्राप्तिस्सैव मुख्यं प्रयोजनं यस्य तं कुरु अपि च यावच्छरीरपातं निषिद्ध
काम्यरहितं निषिद्धानि शास्त्रप्रतिषिद्धानि अकृत्यकरणादीनि अपराधानि काम्यानि कर्माणि अकारणे प्रत्यवाय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ पद्याभ्यामपराधपरिहारं प्रार्थयन् तत्र प्रथमं कर्मवशादागामीनि पापानि न प्रवर्तयेत् पूर्वं प्रवृत्तानि च क्षमस्वेत्याह त्वदेकेति ।
भोकरुणाकर तवाश्रितविधेयतापादककरुणासमुद्र त्वदेकरक्तस्य त्वय्येकेनैवाहितं योग्यस्य रक्तकांतररहितस्येत्यर्थः मम
शरणागतस्य त्वमेव स्वयमेव पापान्यागामीनि न प्रवर्तय यथा न प्रवर्तन्ते तथा कुरु तेषामश्लेषमापादयेत्यर्थः प्रवृत्तानि
इतो वा शरणागतेर्वा पूर्वं प्रवृत्तानि ज्ञाताज्ञातानि निवर्तय क्षमस्वेत्यर्थः सर्वशक्तेस्तवाशक्यं किमपि नास्तीति भावः ८ अथ पद्य

त्वदेकरक्तस्य मम त्वमेव करुणाकर न प्रवर्तय पापानि प्रवृत्तानि निवर्तय ॥८॥
अकृत्यानां च करणं कृत्यानां वर्जनं च मे क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो ॥९॥

तानि सर्वाण्यानन्त्यानि इत्यत्र बहून् हेतून् संबोधनपदैः सूचयन्नाह अकृत्यानामिति देव जगद्विलक्षण यद्वा जगत्सृष्ट्या
दिक्रीडापर यद्वा विजयशील अनेन सर्वशक्तित्वं सूच्यते प्रणतार्तिहर आश्रितदुरितहरत्वेन प्रसिद्ध प्रभो इति शेषि
त्वात् प्राप्तिः सूच्यते मे अनादिप्रारब्धकर्मपरवशस्याकृत्यानां करणं च निषिद्धानां पापानामाचरणं च तथा कृत्या
नां वर्जनं च श्रुतिस्मृतिविहितानां नित्यनैमित्तिककर्मणामननुष्ठानं चेति निखिलं सर्वं क्षमस्व पूर्वश्लोकोक्तनि
वर्तनं तव क्षममेवेति सूचितम् ॥९॥ अंते यतस्त्वं सांगमद्वारसम[illegible]र्पणं स्वयमेव कारितवानसि उ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

८ तत्रत्रपयाकपंचितत्कोडीकरणं च तवस्वभावः अतोहं निर्भरोस्मीति निगमय[illegible]ति श्रीम[illegible]ल्लीति भो श्रीमन्
श्रियःपते त्वयमेव मत्प्रार्थनां विना अनादौ मदुज्जीवनकृषिं कुर्वन्नाचार्य्य समाश्र[illegible] यणा दारा स्वाभि
न्यरमशेषाणि प्राप्यसर्वज्ञत्ते सर्वशक्तौ त्वयि निपतानि निपमेन स्वीकर्तव्यानि पंचांगान्यानुकूल्यसंकल्पा

श्रीमान्नियतपंचांगं मद्रक्षणभरार्पणं अचीकरत्त्वयं स्वास्मिन्नतोहममिहनिर्भरः १

दीनि यस्य तत्र मद्रक्षणभरार्पणं मम रक्षणे स्वप्राप्तिरूपे मदुज्जीवने यो भरो निर्वाहः तस्य समर्पणं स्वीकरः कारि
तवानासि अतो मत्तो भारापनयनात् अहं त्वयि न्यस्तभरस्तदर्थं कर्तव्यशेषरहितः भरन्यासात्परास्मिन्कालेनि
र्भरोविग[illegible]लितसर्वभारोस्मीति सर्वं सुस्थम ॥ १० ॥ श्रीः ॥ ॥ इति श्रीवेदान्ताचार्य्यकृतिषु न्यासद राम
८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA